শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে ত্রিচৎৱারিংশং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে ত্রিচৎৱারিংশং দশকম্॥

## তৃণাৱর্তৱধৱর্ণনম্

ৎৱামেকদা গুরুমরুৎপুরনাথ ৱোঢুং
    গাঢাধিরূঢগরিমাণমপারযন্তী।
মাতা নিধায শযনে কিমিদং বতেতি
    ধ্যাযন্ত্যচেষ্টত গৃহেষু নিৱিষ্টশঙ্কা॥ **43.1** ॥

তাৱদ্ৱিদূরমুপকর্ণিতঘোরঘোষ -
    ৱ্যাজৃম্ভিপাংসুপটলীপরিপূরিতাশঃ।
ৱাত্যাৱপুস্স কিল দৈত্যৱরস্তৃণাৱ -
    র্তাখ্যো জহার জনমানসহারিণং ৎৱাম্॥ **43.2** ॥

উদ্দামপাংসুতিমিরাহতদৃষ্টিপাতে
    দ্রষ্টুং কিমপ্যকুশলে পশুপাললোকে।
হা বালকস্য কিমিতি ৎৱদুপান্তমাপ্তা
    মাতা ভৱন্তমৱিলোক্য ভৃশং রুরোদ॥ **43.3** ॥

তাৱৎ স দানৱৱরোঽপি চ দীনমূর্তি -
    র্ভাৱৎকভারপরিধারণলূনৱেগঃ।
সঙ্কোচমাপ তদনু ক্ষতপাংসুঘোষে
    ঘোষে ৱ্যতাযত ভৱজ্জননীনিনাদঃ॥ **43.4** ॥

রোদোপকর্ণনৱশাদুপগম্য গেহং
    ক্রন্দৎসু নন্দমুখগোপকুলেষু দীনঃ।

ৎৱাং দানৱস্ত্ৱখিলমুক্তিকরং মুমুক্ষু -
স্ত্ৱয্যপ্রমুঞ্চতি পপাত ৱিযৎপ্রদেশাৎ॥ **43.5** ॥

রোদাকুলাস্তদনু গোপগণা বহিষ্ঠ -
পাষাণপৃষ্ঠভুৱি দেহমতিস্থৱিষ্ঠম্।
প্রৈক্ষন্ত হন্ত নিপতন্তমমুষ্য ৱক্ষ -
স্যক্ষীণমেৱ চ ভৱন্তমলং হসন্তম্॥ **43.6** ॥

গ্রাৱপ্রপাতপরিপিষ্টগরিষ্ঠদেহ -
ভ্রষ্টাসুদুষ্টদনুজোপরি ধৃষ্টহাসম্।
আঘ্নানমম্বুজকরেণ ভৱন্তমেত্য
গোপা দধুর্গিরিৱরাদিৱ নীলরত্নম্॥ **43.7** ॥

একৈকমাশু পরিগৃহ্য নিকামনন্দ -
ন্নন্দাদিগোপপরিরব্ধৱিচুম্বিতাঙ্গম্।
আদাতুকামপরিশঙ্কিতগোপনারী -
হস্তাম্বুজপ্রপতিতং প্রণুমো ভৱন্তম্॥ **43.8** ॥

ভূযোঽপি কিন্নু কৃণুমঃ প্রণতার্তিহারী
গোৱিন্দ এৱ পরিপালযতাৎ সুতং নঃ।
ইত্যাদি মাতরপিতৃপ্রমুখৈস্তদানীং
সম্প্রার্থিতস্ত্ৱদৱনায ৱিভো ৎৱমেৱ॥ **43.9** ॥

ৱাতাত্মকং দনুজমেৱমযি প্রধূন্ৱন্
ৱাতোদ্ভৱান্ মম গদান্ কিমু নো ধুনোষি।
কিং ৱা করোমি পুনরপ্যনিলালযেশ
নিশ্শেষরোগশমনং মুহুরর্থযে ৎৱাম্॥ **43.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে ত্রিচৎৱারিংশং দশকং সমাপ্তম্॥